## तुश्छन्दसि। (५९/२००७)

तुः इति तृन्तृचोः सामान्येन ग्रहणम्। त्रन्ताच्छन्दसि विषये अजादी प्रत्ययौ भवतः। पूर्वेण गुणवचनादेव[1] नियमे कृते छन्दसि[2] प्रकृत्यन्तराण्यभ्यनुज्ञायन्ते. [3]त्रन्तादप्यजादी [4]भवत इति। [5]'आसुतिं करिष्ठः' (ऋ. ७.९७.७)। दोहीयसी धेनुः।

[6]भस्याढे तद्धिते (६.३.३५/८३६ वा.) इति पुंवद्भावे कृते 'तुरिष्ठेमेयःसु' (३.४.१५४/२००८) इति तृचो निवृत्तिः॥

## प्रशस्यस्य श्रः। (६०/२००९)

प्रशस्यशब्दस्य श्र इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः। अजादी इति प्रकृतस्य [7]सप्तमी विभक्ति-विपरिणम्यते। ननु च प्रशस्यशब्दस्यागुणवचनत्वाद[8]जादी न सम्भवतः? एवं [9]तर्हि आदेश[10]विधानसामर्थ्यात् तद्विषयो नियमो न प्रवर्तते, अजादी गुणवचनादेव इति। एवमुत्तरेष्वपि योगेषु विज्ञेयम्। [11]सर्वे इमे प्रशस्याः, अयमेषाम् अतिशयेन प्रशस्यः श्रेष्ठः। उभाविमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यः श्रेयान्। अयमस्मात् श्रेयान्। प्रकृत्यैकाच् (६.४.१६३/२०१०) इति प्रकृतिभावात् [12]श्रशब्दस्य टिलोपयस्येतिलोपौ न भवतः॥

## ज्य च। (६१/२०११)

प्रशस्यशब्दस्य ज्य इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः। सर्वे इमे प्रशस्याः, [13]अयमेषामतिशयेन प्रशस्यः ज्येष्ठः। उभाविमौ प्रशस्यौ, अयमनयो[14]रतिशयेन प्रशस्यः ज्यायान्। अयमस्मात् [15]ज्यायान्। 'ज्यादादीयसः' (६.४.१६०/२०१२) इत्याकारः॥

## वृद्धस्य च। (६२/२०१३)

वृद्धशब्दस्य च ज्य इत्ययमादेशो भवत्यजाद्योः प्रत्यययोः परतः। तयोश्च सत्त्वं [16]नियमाभावेन पूर्ववज् [17]ज्ञाप्यते। सर्वे इमे वृद्धाः, अयमेषामतिशयेन वृद्धः ज्येष्ठः। उभाविमौ वृद्धौ, अयमनयोरतिशयेन [18]वृद्धः ज्यायान्। अयमस्माज् ज्यायान्। प्रियस्थिर (६.४.१५७/२०१६) इत्यादिना वृद्धशब्दस्य [19]वर्षादेशो विधीयते। वचनसामर्थ्यात् पक्षे सोऽपि भवति। वर्षिष्ठः। वर्षीयान्॥

---

1. इति नियमे प्राप्ते ड. 2. विषये इत्यधिकम् ग, प्रकृत्यन्तरम् क. 3. तस्मात् इत्यधिकम् क. 4. प्रत्ययौ इत्यधिकम् ड. 5. आसुतं कर्तिष्ठ क. 6. भस्याढे – निवृत्तिः नास्ति ड. 7. प्रथमा तस्य अजादी इत्यस्य विभक्तिः क. 8. अजादीनां संभवत एव क. 9. तर्हि नास्ति ब. 10. विधानात् एव क.फ. 11. सर्वे –लोपौ न भवतः नास्ति ह. 12. श्रस्य फ. 13. अयमेषां श्रेष्ठः क. 14. ज्यायान् क. 15. श्रेयान् ह. 16. नियमाभावात् क. 17. ज्ञातव्यः क. 18. वृद्धः नास्ति. 19. वर्षादेशं वक्ष्यति क, वर्षादेशो वक्ष्यते ह.